National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2018; 1(20): 83-85
© 2018 NJHSR
www.sanskritarticle.com

**डा. ओंकार यशवंत सेलूकर**
अति.अध्या., वेदभाष्य विभाग,
श्री. वें. वे. विश्वविद्यालय,
तिरुपति

**Correspondence:**
**डा. ओंकार यशवंत सेलूकर**
अति.अध्या., वेदभाष्य विभाग,
श्री. वें. वे. विश्वविद्यालय,
तिरुपति

# दर्शपूर्णमासयोः समागतानां पारिभाषिकशब्दानां विवेचनम्

**डा. ओंकार यशवंत सेलूकर**

विश्वेऽस्मिन् उपलभ्यमानेषु समस्त साहित्येषु वेदाः प्राचीनतमाः ग्रन्थाः सन्तीत्यत्र न कस्यापि सन्देहः। ते इमे वेदाः अपौरुषेयत्वादलौकिकाः एव। तस्मात् वेदेषु बहवः तादृशाः शब्दाः सन्ति ये लोके अप्रसिद्धाः अनवगताः वा सन्ति। अत एव व्याकरणशास्त्रेऽपि अनेकत्र बहुलं छन्दसि इत्यादिसूत्रेन वैदिकशब्दानां लौकिकशब्दात् पार्थक्यं प्रदर्शितम्। तदर्थमेव वैदिकशब्दराशीनामर्थज्ञानाय व्याकरणशास्त्रात् पृथक् निरुक्तशास्त्रस्यापि प्रादुर्भावो जातः। यत्र व्याकरणसूत्रसंस्कारात् पृथक् निर्वचनप्रक्रियया वैदिकशब्दानां व्याख्या कृता। तथापि वेदेषु नैकाः शब्दाः सन्ति येषां ज्ञानं यज्ञीयप्रयोगज्ञानेनैव भावयितुं शक्यते। अतः एतादृशानां पारिभाषिकशब्दानां ज्ञानाय मीमांसकाः अपि प्रयत्नं कृतवन्तः। यत्र यज्ञीयपारिभाषिकशब्दानां विवेचनेन वैदिकशब्दानां अर्थज्ञानं कारयन्ति स्म। वर्तमानसमये व्याकरणप्रक्रियया निरुक्तप्रक्रियया च वेदार्थज्ञानस्य कार्यं विपुलप्रमाणेन भवत्येव। किन्तु लिके श्रौतज्ञीयकर्मकाण्डानां तादृशप्रचाराभावात् कर्मकाण्डसम्बन्धिवैदिकशब्दाराशेः अर्थावगमः कर्तुं क्लेषोऽनुभूयते। अतः श्रौते समागतानां पारिभाषिकशब्दानां कर्मकाण्डप्रयोगानुसारं व्याख्यानेन वेदार्थज्ञाने सहाय्यं भवत्येव। अनयैव धिया दर्शपूर्णमासयोः समागतानां केषाश्चित् पारिभाषिकशब्दानां व्याख्यानं पत्रेऽस्मिन् क्रियते।

श्रौतयागेषु सर्वासामिष्टीनां प्रकृतित्वेन विहितोऽयं दर्शपूर्णमासयागः। तत्र यागो नाम देवतोद्देशेन द्रव्यस्य त्यागः इति।[1] प्रक्रिया इयं प्राधान्यतया स्वाहाकारेन वषट्कारेन सम्पाद्यते। कात्यायन श्रौतसूत्रे एषा प्रक्रिया यजति जुहोति शब्दाभ्यां प्रतिपादिता। तयोः स्वरूपमपि कथितं यथा-

यजति - 'तिष्टद्धोमा वषट्कारप्रदाना याज्यापोरोनुवाक्यावन्तो यजतयः' इति।[2]

जुहोति – 'उपविष्टद्धोमा स्वाहाकारेणप्रदाना जुहोतयः'इति।[3]

सूत्रानुसारं यजनप्रक्रिया वषट्कारेन याज्यापुरोनुवाकाभ्यां च सम्पाद्यते। अतः प्रसंगावशात् तयोरपि स्वरूपमत्र अवगन्तव्यमस्ति।

**याज्या-**

येयजामहे इति पूर्विका वषट्कारान्ता हविः प्रदानार्था वक्ष्यमाना ऋक् इज्यते अनया इति व्युत्पत्या याज्या इति पदाभिधेया। यथा पूर्णमासयागे अग्निदेवतोद्देशेन अनुष्ठीयमाने यागे पठ्यमाना 'येयजामहे अग्निं भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिविमूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहां३ वौ३षट्'[4] इति ऋक्।

**अनुवाक्या (पुरोनुवाक्या) –**

पुरः अर्थात् यागात् पुर्वं हविर्ग्रगणकाले यस्याः देवतायाः कृते यागः क्रियते ताम् देवतामाह्वातुं अनूच्यमाना ऋक् पुरोनुवाक्या (अनुवाक्या) नाम्नोच्यते।

फलीकरणम्- व्रीहीणां यवानां वा अवहननानन्तरं कणादिनिरसनेन संशोधनं फलीकरणम्। दर्शपूर्णमासे एषा प्रक्रिया वारत्रयमनुष्ठीयते अतः अस्य प्रयोगस्य त्रिःफलीकरणमित्यपि संज्ञा भवति।

**अवदानम्-**

यागं कर्तुं जुह्वादिषु यागपरिमितस्य भागस्य ग्रहणार्थं स्थापितहविषः खण्डनम् अवदानम् इत्युच्यते। यगे चतुरवदानं पंचावदानंचेति पक्षद्वयं विहितम्। तत्र चतुरवदानप्रसंगे जुह्वायां पुरोडाशस्य द्विरवदानं गृहित्वा अन्ये द्वे आज्यस्यावदानं स्वीक्रियते। तत्र आज्यस्य ये द्वे अवदाने स्तः तयोः उपस्तरणं अभिघारणं चेति विषेशसंज्ञौ स्तः। तयोः स्वरूपम् द्रष्टव्यं।

**उपस्तरणम् – अभिघारणम् च**

यागार्थं जुह्वादिषु पुरोडाशादिहविषः ग्रहणात् प्राक् आज्यस्य प्रक्षेपः उपस्तरणमित्युच्यते।

तथा तत्रैव जुह्वादिषु पुरोडाशादिहविषः ग्रहणानन्तरम् आज्यस्य प्रक्षेपः अभिघारणमित्युच्यते। तदा को नाम पुरोडाशः इति जिज्ञासायां उच्यते

**पुरोडाशः –**

व्रीहिपिष्टैर्यवपिष्टैर्वा निर्मितः आहवनीयाग्नौ गार्हपत्ये वा कपालोपरि पक्वः यज्ञीयहविविषेशः पुरोडाशः इति। तत्र ध्यातव्यमस्ति यत् पुरोडाशाधारभुतानां कपालानां संख्यानुसारं पुरोडाशाः परस्पर भिन्नाः भवन्तीति। तत्र प्रसंगानुसारं कपालानां स्वरूपमपि ज्ञातव्यम्।

**कपालानि**

मृत्तिकानिर्मितानि द्वंगुलोच्छ्राणि त्रंगुलवृत्तानि पुरोडाशस्याधोभागे उपधीयमानानि कपालानि सन्ति। एतेषां संख्या यथापुरोडाशं निश्चीयते। यथा

| देवतासम्बन्धिपुरोडाशः | कपालसंख्या | सन्दर्भः |
|---|---|---|
| द्यावापृथिवी | एककपालः (पुरोडाशः) | का.श्रौ.४/६/५ |
| आश्विन | द्विकपालः(पुरोडाशः) | दे.प.पृ.५०२ |
| विष्णुः | त्रिकपालः (पुरोडाशः) | श.ब्रा.५/२/४/१ |
| वरुणः | चतुः कपालः(पुरोडाशः) | बौ.श्रौ. २३/४ |
| इन्द्रः | पंचकपालः (पुरोडाशः) | मै.सं २/३/६ |
| मरुत् | सप्तकपालः (पुरोडाशः) | श,ब्रा. २/४/२/१३ |
| पितृलोमवान् | षट् कपालः (पुरोडाशः) | का.श्रौ.५/८/९ |
| अग्निः | अष्टाकपालः (पुरोडाशः) | श.ब्रा.२/४/२८ |
| विष्णुः | नवकपालः (पुरोडाशः) | आ.श्रौ.१०/२०/१२ |
| वरूणः | दशकपालः(पुरोडाशः) | का.श्रौ.२३/२/१८ |
| अग्नीषोम | एकादशकपालः (पुरोडाशः) | दे.प.पृ.२७ |
| ऐन्द्राग्नः | द्वादशकपालः (पुरोडाशः) | दे.प.पृ.१८ |
| मरुत् | त्रयोदशकपालः (पुरोडाशः) | का.श्रौ.२५/४/३५ |
| चन्द्रमसे प्रतिदृश्यायै | पंचदशकपालः (पुरोडाशः) | तै.ब्रा. ३/१/६ |

अनेन प्रकारेण यथा देवतानुसारं विहितस्य पुरोडाशस्य कृते कपालानां संख्या ऋषिभिः निर्धारिता।

उपसर्जनीः- पुरोडाशस्य निर्माणार्थं व्रीहियवयोर्वा पिष्टस्य संयवनार्था तप्ता आपः उपसर्जन्यः।

**आमाद् – क्रव्याद्**

वाजश्रुतौ प्रथमाध्याये दर्शपूर्णमासप्रकरणे 'अपाग्ने अग्निमामादं जहि निष्क्रव्यादम् सेध'[5] अयं मन्त्रः पठितः। मन्त्रभागेऽस्मिन् आमादं क्रव्यादं चेति अग्नेः विशेषणे स्तः। तयोः अर्थः यथा

आमाद् – आमम् अर्थात् अपक्वं अत्तीति आमाद् मनुष्याणामोदनपाकादिहेतुरग्निः।

क्रव्याद्- क्रव्यं पललम् अत्तीति क्रव्यात् शवदाहकोऽग्निः। एवं प्रस्तुतमन्त्रेन पुरोडाशश्रपणार्थं यागयोग्यमग्निमेव स्वीकर्तुं निर्दिष्टाग्निद्वस्य अपाकरणं करोत्यध्वर्युः।

पत्नीसन्नहनम् - मुंजरज्जुनिर्मितः पत्नीबन्धनार्थः रज्जुविशेषः पत्नीसन्नहनम्। पत्नी कटीप्रदेशे वस्त्रोपरि अस्य बन्धनं करोति।

अंसौ-श्रोण्यौ च

आहवनीयाद्यग्नीनां वेद्याः वा आग्नेयैशानकोणौ अंसौ स्तः। तत्र आग्नेयः कोनः दक्षिणांसः, ऐशानकोणश्च उत्तरांसः इत्युच्यते। एवमेव नैरुत्यवायव्यकोणौ दक्षिणोत्तरश्रोण्यौ स्तः।

**स्तुपः-**

'विष्णो स्तुपोऽसि'[6] इत्यस्मिन् मन्त्रे स्तुपः शब्दो श्रूयते। तत्र यज्ञकर्मणि स्तुपो नाम एकमुष्टिप्ररिमाणं कुशसमुहः। ब्राह्मणे अस्य प्रयोगः केशसंघातः इत्यर्थे प्रयुक्तः। यथा शिरसि शिखा वर्तते तथैवायं स्तुपः यज्ञपुरुषस्य शिखा वर्तते इति भावः। दर्शपूर्णमासयागे प्रस्तरमुद्दिश्य अस्य मन्त्रस्य पाठो भवति।

**प्रस्तरः-**

प्रस्तरः कुशमुष्टिविषेशः। यं वेद्यामासाद्य तस्योपरि स्रुचामासादनं क्रियते।

निगदाः- 'अग्निमग्नीत् संमृड्ढि'[7] इत्यादयः प्रैषाः निगदशब्देनोच्यते। एतेषामपि मन्त्रत्वं कात्यायनाचार्यैः प्रतिपादितम्।[8]

**वेदः-**

वाजश्रुतौ 'वेदोऽसि येन त्वं देव वेद'[9] इत्यस्मिन् मन्त्रभागे वेदः शब्दः समागतः। वेदशब्दोऽयं द्विविधः। एकः आद्युदात्तः अन्तोदात्तश्चापरः। तत्र आन्तोदात्तः वेदशब्दः कुशमुष्टिवाचकः आद्युदात्तश्च ऋग्यजुस्सामग्रन्थवाचकः। तत्र आद्युदात्तस्य वेदशब्दवाच्यस्य स्वरूपं तावत् एकपंचाशत् कुशपत्राणां मुष्टिं मध्यभागे मोटनद्वयकरणेन उपविष्टवत्सजानुसदृशमुष्टिः वेदः इति।

स्तम्बयजुः- वेद्यां एकं तृणमासाद्य स्फ्येन समन्त्रं छिन्नो दर्भः स्तम्बयजुः।

**पवित्रम्-**

प्रादेशमात्रः कुशद्वयस्य समुहः पवित्रेति नाम्नोच्यते। यस्य कुशस्य मध्ये कुशान्तरम् नास्ति सोऽनन्तर्गर्भः। तादृशौ द्वौ कुशौ प्रादेशमात्रं यावत्परिमाणं छित्वा पवित्रं सम्पाद्यते।

**पर्युक्षणम्-**

जलसहितेन पाणिना अग्न्यायतनात् बहिः ऐशानदिशमारभ्य पुनस्तदृक्पर्यन्तं अस्पर्शनेन प्रदक्षिणं पर्युक्षणमित्युच्यते।

आघारः- वह्नौ कश्चिद्देशमारभ्य देशान्तरपर्यन्तं समन्त्रम् आज्यधारया प्रक्षेपणं आघारः। दर्शपूर्णमासयोः पूर्वोत्तरेति द्वे आघाराहुती स्तः।

अन्वारम्भणम्- अन्वारम्भणं नाम स्पर्शः।

**प्रयाजाः-**

प्रकर्षेण इज्यन्ते देवताः एभिस्ते प्रयाजाः। प्रधानयागात्पूर्वं एतेषामनुष्ठानं भवति। पंचप्रयाजाः, नवप्रयाजाः, एकादशप्रयाजाश्चेति एतेषां संख्या यागानुसारं निश्चीयते। दर्शपूर्णमासे समिधः, तनूनपात्, इडः, बर्हिः, स्वाहा इति पंचप्रयाजा एव सन्ति।

अनुयाजाः- अनु अर्थात् पश्चात् प्रधानयागानन्तरं इज्यन्ते देवताः एभिः ते अनुयाजाः। दर्शपूर्णमासे तु त्रयोनुजा सन्ति।

**इध्मः**

पलाशादिवृक्षाणां अरत्नीमात्रा पंचदशसमिधः इध्म नाम्नोच्यते। अनेन इध्मेन अध्वर्युः अग्निं इन्धे (संदीपयति) तस्मात् इन्धनसाधनत्वात् तस्य इध्म इति नाम सम्पन्नम्। उक्तं यथा वाजश्रुतौ 'इन्धे ह वा एतदध्वर्युः इध्मेनाग्निं तस्मादिध्मो नाम'।[10] सामिधेनीयागे होत्रा पठ्यमाने सामिधेनीमन्त्रापाठावसरे अध्वर्युः आहवनीयाग्नौ इध्मकाष्टान् प्रक्षिपति। सामिधेनीमन्त्रसंख्यानुसारं इध्मकाष्टानां संख्या निश्चीयते।

**सामिधेन्यः**

होता 'प्रवोवाजा' इत्यादिभिः ऋग्भिः अग्निं समिन्धे। अतः समिन्धनसाधनत्वात् एतासां ऋचां सामिधेन्यः इति नाम निष्पन्नम्। यथा प्रयोजनं पंचदश-एकादश-एकविंशेति सामिधेनीनां ऋचां संख्या शास्त्रे निहिता।[11]

**प्राशित्रम्-**

प्रधानहविषः सकाशात् स्वीकृतः ब्रह्मणः भागविशेषं प्राशित्रमिति। ब्रह्मणः एतत् प्राशित्रं यस्मिन् पात्रे गृह्यते तत्पात्रं प्राशित्रहरणम् इति नामोच्यते।

**अन्वाहार्यः-**

अन्वाहार्यो नाम चतुर्भिः ऋत्विग्भिः भोजनीयः ओदनविशेषः। अन्वाहरति अर्थात् परिहरति अदक्षिणादियज्ञसम्बन्धी दोषजातं अनेन इति व्युत्पत्त्या अन्वाहार्येति अस्य संज्ञा जाता।

अनेनप्रकारेण अतिविस्तारभयात् मात्र दर्शपूर्णमासयागयोः समागतानां केषांश्चिदेव महत्वपूर्णानां पारिभाषिकशब्दानां विवेचनेन पत्रस्यास्य अत्रैव विरामः क्रीयते।

**पादटिप्पणी -**

1 का.श्रौ.१/२/२

2 का.श्रौ.१/

3 का.श्रौ.१/

4 वा.सं. १५/२३

5 वा.सं. १/१७

6 वा.सं. २/२

7 का.श्रौ.३/१/१२

8 'ऋचो यजूंषि सामानि निगदाः मन्त्राः' इति। का.श्रौ.१/३/१

9 वा.सं. २/२१

10 श.ब्रा. १/३/५/१

11 श.ब्रा. १/३/५/९-११